Shri Raghunatha Temple MSS. Library,

५८२२ JAMMU

No. १३६२ क

Title त्रिपुरसुन्दर्याः कवचम्

Author

Extent ८ पत्र Age

Subject तन्त्रम्

5823
8
50

त्रिपुरसुंदर्याः कवचं

नं. १३६२

नं० ~~२१२~~ ३१८

ॐश्रीगुरवेनमः नमोगणेश्वरायनमः श्रीदेव्युवाच ॐदेवदेवमहादेवभक्तानांप्री
तिवर्धन यन्मयाचिंतेगुरानाथकिमर्थेनप्रकाशते १ राजराजेश्वरीदेव्यास्त्रिपुराया
स्वभावकं कवचंयदिमेप्रीतिःकथयस्ववृषध्वज २ श्रीभैरवउवाच सहस्रलक्ष
ताराशिवारिविलासिपुनःपुनः स्त्रीस्वभावान्महादेविपुनस्त्वंपरिपृच्छसि ३ अमं
तगोपनंगुह्यंकवचंसर्वकामदं तथापिकथयाम्यद्यतवप्रीत्यावरानने ४ ॐअ
स्यश्रीराजराजेश्वरीमहात्रिपुरसुंदरीकवचमंत्रस्य श्रीदक्षिणामूर्तिर्ऋषिः चिदा
छंदः श्रीचैतन्यरूपिणीदेव्यासाधनेचित्कलिः पद्माबीजं श्रीमहात्रिपुरसुंदरीराजरा
जेश्वरीदेवता ममयथोक्तफलसाधने श्रीदेवीप्रीत्यर्थंजपेपाठेविनियोगः ३
निकरन्यासः ऐं १ अथमत्रं अंगुष्ठाभ्यांनमः क्लीं २ तर्जनीभ्यांस्वाहा सौः

त्रिक

ऐं ३ मध्यमाभ्यां वषट् ऐं १ अनामिकाभ्यां हुं क्लीं २ द्वितीयकूटं कनिष्ठिकाभ्यां वौषट्
सौः ३ तृतीयं अस्त्राय फट् एवं षडंगः ऐं १ हृदयाय नमः ऐं २ शिरसे स्वाहा ३ शिखा
यै वषट् १ कवचाय हुं २ द्वितीयं नेत्रत्रयाय वौषट् सौः ३ तृतीयकूटं अस्त्राय फट्
अथ ध्यानम् बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् पाशांकुशशरांश्चापं धा
रयन्तीं शिवां भजे ऐं भैरवी पातु शीर्षे मे देवी त्रिपुरभैरवी भाले तु वदने बाला पा
तु सर्वत्र सिद्धिदा ६ ऐं श्रीकंठे सदा पातु त्रिपुरा व्योमसरस्वती कर्णे देवकला पा
तु सिद्धेश्वरी ललाटके ७ त्रिकूटं तु सदा पातु त्रिपुरा परमेश्वरी हृदये व्यान्महा
विद्या राजराजेश्वरी च सा ८ मालिनी नाभिदेशे व्यान्महात्रिपुरभैरवी लोपामुद्रा
गुदे पातु देवी त्रयोदशीपरा ९ मेढ्रे सा त्रिपुरा पातु त्रिपुरेशी [illegible] पातु

एदेशे नकामेश्वरी हरप्रिया १० श्रींपातु सर्वगात्रेषु निर्मलात्रिपुरेश्वरी हंसश्वासादि
निःश्वासे नासनेत्रे घ्राणसुंदरी ११ हरप्रियाब्रह्मरंध्रे पायात्परदेवता रतिनाथाललला
टेत्रोनेत्रे वाग्भवमालिनी १२ लोपामुद्राभ्रुवोर्मध्ये गौं पायात्सदावतु पार्वतीमौल
लाटेश्यानेत्रे वाग्भवमालिनी १३ श्रोत्रे रतिप्रियापातु घ्राणेशक्रप्रियावतु कपोले
पातु सर्वज्ञशिवगामापश्चिमेतथा ॐ ह्रे शंभुप्रियापातु दंते ब्राणेस्तु रत्नतु जीवो
जिह्वाग्रदेशे तु ब्रह्माण्यान्क परेतथा १४ हंसः ए ह्रसदापातु श्यामी सर्वांगकेवतु
श्लोके हृदये पातु स्तनौ पातु भृगुप्रिया क्रोधः उत्तरौ सदापातु पिनाकीलिंग
लोचने शीर्षादिपादपर्यंते सर्वांगे परमेश्वरी १५ आधारे वाग्भवः पातु कामरा
जो हृदंबुजे त्रैलोक्ये उमरं पातु ब्रह्मरंध्रे तु सर्वदा शीर्षे कूटत्रयं पातु तथा कंठे

त्रिक॰

2

सदावतु सर्वमंत्रकपोलेव्यान्सर्वं सर्वत्र रक्षतु अणिमा पश्चिमे पातु लघिमा चोत्तरे
तथा पूर्वे व्यान्महिमासिद्धिरीशिता दक्षिणेवतु १९ वशित्वा वायुनिलये प्राका
म्यसिद्धिदा भुक्तिसिद्धिस्तथाग्नेय्यामिच्छासिद्धिश्च राक्षसे २० अधः पातु प्राप्तिसि
द्धिर्मोक्षसिद्धिस्तथोर्ध्वके ब्रह्माणी पूर्वदिग्भागे माहेशी पातु पश्चिमे २१ कौमारी
दक्षिणे पातु उत्तरे शक्रवल्लभा ऐशान्यां वैष्णवी पायाद्वाराही वायुमंडले २२ चामु
ण्डा नैरृते पातु महालक्ष्मीर्धनंजये सर्वसंक्षोभिणी मुद्रा मूलाधारे सदावतु २३ सर्व
विद्राविणी पातु स्वाधिष्ठाने सुरेश्वरी सर्वाकर्षिणमुद्रा व्यान्मणिपूरे वरानने २४ स
र्ववंसो सर्वदा पातु हृदये परमेश्वरी मुद्रा सर्वोन्मदा पातु हृदयोपरि सुंदरि २५ विशु
द्धिचक्रे देवेशि पातु नित्यं महाङ्कुशा वक्त्रे नित्यं महेशानि त्रिविधा परिरक्षतु २६ आज्ञा

चक्रे सदा पातु बीजमुद्रा विषापहा सहस्रारे महामुद्रा खेचरी पातु सर्वदा २७ नवचक्रे
स्थिता मुद्रा ह्यष्टादि पंचके वत योनिमुद्रा महामुद्रा सर्वत्र परिरक्षतु २८ आधारादिम
हाचक्रे त्रिखण्डा पातु सर्वदा कामाकर्षणरूपाभ्यां सदाकर्षणकर्मणि २९ बुद्ध्याकर्ष
णरूपाभ्यां बुद्धि विकर्षणे अहंकाराकर्षिणीभ्यां सर्वाहंकारकर्षणी ३० शब्दाक
र्षणरूपाभ्यां ब्बैध्धा कर्षेतु सर्वदा स्पर्शाकर्षणरूपाभ्यां स्पर्शाकर्षणकर्मणि रू
पाकर्षणरूपाभ्यां सर्वरूपनिरूपणे रसाकर्षणरूपाभ्यां सदा सर्वरसेषु मे ३२ गं
धाकर्षणरूपाभ्यां सर्वगंधोपलब्धिषु चित्ताकर्षणरूपाभ्यां मायायाः कृष्टकर्मणि ३३
वैर्याकर्षणरूपाभ्यां सर्ववैर्यवियोः सदा स्मृत्याकर्षणरूपाभ्यां सर्वत्र स्मृतिकर्म
णि ३४ नामाकर्षणरूपाभ्यां नामव्याहरणे सदा बीजाकर्षणरूपाभ्यां सर्वबीज

त्रिक
३
3

प्रबोधने ३५ आत्माकर्षणरूपाव्यात्सर्वात्माकर्षणे सदा अमृताकर्षिणी पायादमृ
ताकर्षणे सदा ३६ शरीराकर्षिणी पातु शरीराकर्षणे सदा सर्वकार्येषु सर्वत्र पातु
मां त्रिपुरेश्वरी ३७ अनंगकुसुमा पातु पूर्वस्यां दिशि सर्वदा अनंगमेखला पातु दक्षिणे
कामरूपिणी ३८ पश्चिमे सर्वदा पायादनंगमदनाप्रिये उत्तरे पातु देवेशि अनंगम
दनातुरा ३९ अनंगरेखा चाग्नेय्यां पातु नित्यं महेश्वरि नैरृत्यां पातु देवेशि सर्व
दानंगरूपिणी ४० अनंगांकुशा वायव्ये पातु नित्यं महावरप्रदा अनंगमालिनी देवी
ऐशान्यां पातु सर्वदा ४१ चक्रस्था सर्वदा पातु देवी त्रिपुरसुंदरी क्षोभिणी हृदये पा
तु शीर्षे विद्राविणी तथा ४२ आकर्षिणी शिखां पातु कवचे ह्लादिनी तथा सर्व
संमोहिनी नेत्रे सर्वगात्रेषु स्तंभिनी ४४ आकाशे जृंभिनी पातु पाताले तु वशंकरी

रंजिनी देवलोके व्यातून्मादिनी च भूतले सर्वार्थसाधनी पायाद्भूतप्रेतालये सदा
सिद्धानामालये पातु सर्वसंपत्तिदायिणी राजस्थानेस्तु यक्षाणां सर्वमंत्रमयी प्रिये
श्मशाने निवासेषु सर्वद्वंद्वक्षयंकरी सर्वत्र सर्वदा पातु देवी त्रिपुरवासिनी सर्व
सिद्धिप्रदा पातु सर्वसंक्षेषु रक्षतु सर्वसंपत्प्रदा देवी पातु राजगृहे सदा सर्वप्रि
यंकरी पातु सर्वलोकेषु सर्वदा सर्वदा पातु मां देवी सर्वमंगलकारिणी सर्वका
मप्रदा देवी सर्वकोणेषु रक्षतु ४७ ऐश्वर्ये सर्वदा पातु सर्वदुःखविमोचिनी सर्वश
त्रुप्रशमनी पायान्निःसंशयमालये ४८ सर्वारंभे पातु देवी सर्वविघ्नविनाशिनी
सर्वांगसुंदरी देवी सर्वांगमभितोवतु स्नेहसौहार्दकामेषु पातु सर्वांगसुंदरी स
र्वसौभाग्यकार्येषु सर्वसौभाग्यदायिनी सर्वत्र सर्वदा पातु त्रिपुराश्रीः शुभप्रदा

त्रिक०
५

सर्वत्राचगृहेपातुसर्वशक्तिमयीवने ५० सर्वैश्वर्यप्रदामार्गे सर्वज्ञानमयीज
ले सर्वव्याधिषुसर्वत्रसर्वव्याधिविनाशिनी ५१ सर्वदासर्वतःपातुसर्वाधारस्व
रूपिणी सर्वपापहरादेवीसर्वमार्गेषुरक्षतु ५२ सर्वानंदमयीदेवीनानासंक
टगोचरे सर्ववैरिभयेपातुसर्वरक्षास्वरूपिणी सर्वसंकल्पकार्येषुसर्वकाम
फलप्रदा सर्वत्रसर्वदापातुदेवीत्रिपुरमालिनी ५४ वशिनीवश्यकार्येष्वा
कामेश्वरीचस्तंभिनी मोहनेमोदिनीपातुउच्चाटेविमलावतु वश्यकार्येऽरु
णापातुजयिनीजयकर्मणि सर्वेश्वरीसर्वकार्येकौलिनीभेदकर्मणि नंदेश्व
रीपातुनित्यंदेवीसिद्धेश्वरीमम पाशांकुशधनुर्बाणैः सर्वतःकामरूपिणः
रक्षंतुसततंभद्रेसर्वत्राणुपदेवताः षडंगयुवतीपातुषडंगेषुमहेश्वरी चंडेश्व

रीपातु देहे दानेक्रुद्धात्मसंज्ञका कामेश्वरीरत्नौ पातु देवव्रजेश्वरी तथा ५८
भगमालिनी श्रीकामेसर्वज्ञत्रिपुरांबिका बिंदुचक्रेश्वरीपातु सुंदरीतु शिवा
नते सर्वमंत्रेश्वरीपातु सर्वमंत्रप्रसादने योगीश्वरीस्नानकाले सर्वविद्येश्वरी
शिवे सर्वपीठेश्वरीपायादासनेशयनादिके ५९ सर्ववागीश्वरीपातु सर्ववागी
श्वरीपदे सर्वविद्येश्वरीपातु सर्व~~सिद्धिप्रदायिनी सर्वकार्येषु सर्वत्र~~ विद्या
समन्वये ६० सर्वसिद्धेश्वरीपातु सर्वसिद्धिप्रदायिनी सर्वकार्येषु सर्वत्र पा
तु त्रिपुरसुंदरी ६१ कामेश्वरी तथा पातु तिथौ प्रतिपदि प्रिये भगमालिनी द्वि
तीयायां देवी सर्वार्थसाधिनी ६२ तृतीयायां पातु नित्यक्लिन्ना तु मदनातुरा
चतुर्थ्यां पातु भेरुंडा पंचम्यां वह्निवासिनी ६३ महाविद्येश्वरी षष्ठ्यां सप्तम्यां

त्रिक॰
५
5

शिवहूतिका अष्टमांशे त्वजिता पातु नवमांशे कुलसुंदरी ६४ नित्यानित्या दशमांशे तु
पायान्मम कलसिद्धिदा एकादशांशे नीलपताका द्वादशांशे विजया तु ६५ त्र
योदशांशे तु देवेशि सर्वदा सर्वमंगला ज्वालामाला चतुर्दशांशे शूलिनी श्रीं मायां तु त्रि
त्रिणी ६६ पंचदशांशे सदा पातु श्रीमत्त्रिपुरसुंदरी राजराजेश्वरी पातु सर्वका
लेषु षोडशी ६७ इतीदं कवचं देवि ब्रह्मलोकेषु दुर्लभं नवश्रीत्यामयाख्यातं
गोपनीयं स्वयोनिवत् ६८ नवनाथिश्रुते देवि सर्वयज्ञफलं लभेत् सर्वपापैः
येयां निर्वांछा सर्वत्र सिद्ध्यति ६९ नाभ्यांछन्नगणं स्तोत्रं वा व्याख्यानं चापि नक्वचिते
तस्माच्छन्नगणं ध्यानं ध्यानाच्छन्नगणो मनुः ७० मंत्राच्छन्नगणो देवि कवचं म
स्मेतादिने शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ७१ संस्थाप्य वामभा

गेजशक्तिस्त्वामिमपरायणीम् रक्तवस्त्रसमासीनो शिवमंत्रपरो शुभो याशक्तिः
स्तामहादेवीशिवरूपस्तसाधकः अन्योन्याचिंतनादेविहरतन्मयजायते ७३ श
क्तिशक्तोयजेदेविश्रीचक्रेलक्षणायते भोगेश्वमयपकोशेस्तांस्थूलेश्वसदासिनेः ७४
नमूलकवचंदिव्यंपटेदेकमनाः प्रिये तस्मात्सर्वार्थसिद्धिःस्यात्मात्रकार्याविचा
रणा ७५ इदंरहस्यंपरमंपरंस्वस्त्यपनेमहत् यस्तुभक्त्यापठेद्देविसृष्टणयाद्दास
माहिनः ७७ ससर्वांल्लभतेकामान्परेदेवीपदंव्रजेत सकृद्यस्तपठेद्देविकवचं
देवदुर्लभं सर्वयज्ञफलंतस्यभवत्येवनसंशयः संग्रामेषुजयेच्छत्रून्मातंगानिव
केसरी ७८ दहेत्तणं यथावह्निस्तथाशत्रूंजयेत्सदा नतस्यपापंसशस्त्राणिशरीरे
प्रभवंतिहि नतस्यव्याधिःकदाचिन्नदुःखंनास्तिवरानने गतिस्तस्यैवसर्वत्रवायोस्त

त्रिकः
९
6

स्यात्सदा भवेत् ८० दीर्घायुः कामभोगेशो धनधान्यसमृद्धिमान् जितव्याधीभृग
वान्स्याद्गुणवाननपि जायते ८१ चतुर्वर्गः करे तस्य तिष्ठत्येव न संशयः अन्यस्य च
लभः सोऽपि पुत्रदारसमन्वितः ८२ इहलोके सुखी भूत्वा परे मुक्तो भविष्यति न
तस्य दुर्गतिर्देवि कदाचिदपि जायते ८३ दुर्ग्रहाः सग्रहा यान्ते वशं गच्छन्ति मा
नवाः न तस्य विघ्नो भवति न शोको भुवि जायते ८४ वेतालाश्च पिशाचाश्च राक्षसाः
समयप्रदाः ते सर्वे विलयं यान्ति कवचस्यास्य कीर्तनात् ८५ तत्र देशे न दुर्भिक्षं
न च मारी प्रजायते न च रोगाः प्रजायन्ते नोत्पाताः प्रभवन्ति च ८६ त्रिविधाश्चैव यो
गिन्यस्तस्य रक्षणसन्निधौ शान्तिं चैव प्रयच्छन्ति रक्षन्ति पुत्रवत्सदा ८७ शात्रवास्त
स्य देवेशि चिन्तनात्प्रलयं गताः विनश्यन्ति न संदेहो योगिन्यो भक्षयन्ति तान् ८८

शान्तिकादीनि कर्माणि मारणादीनि यानि च वाक्यमात्रेण देवेशि तस्य सिद्ध्यन्ति
भूतले ४९ न पापैर्लिप्यते सोऽपि महोग्रैरपि दारुणैः न कालस्य वशं गच्छेन्न जराया
नतुः खिन्नः ५० सर्वदा च सुखवासितः सर्वतीर्थफलं लभेत् नानेन सदृशः कश्चि
त्कवचोऽस्ति विनायके ५१ देवासुरमनुष्याणां नवरूपं सुखावहं येन विज्ञानमात्रेण स्म
तेनैव च सुंदरि ५२ प्रत्ययो लभते कामान्मुक्तिमार्गं च गच्छति सर्वलक्षणहीनोऽपि
स्मरणात्कलुषापहः ५३ ग्रहोकवचमाहात्म्यं पठमानस्य नित्यशः विनापि लय
योगेन सयोगसमतां व्रजेत् ५४ भूर्जे त्वचि समालिख्य यंत्रं मंत्रविनिर्मितं मध्ये
त्रिकोणं सलेख्य साध्यसाधकयोर्लिपिम् ५५ नरूर्ये शूलमंत्राख्यमातृकाभिश्च वे
ष्टयेत् कालागुरुविमिश्रेण चंदनेनापि सुंदरि ५६ पन्नयंत्रं महेशानि स्वर्णास्वरसद्व

त्रिकः
८

लेभम् गोरोचनाकुंकुमाभ्यां तद्धास्येककवचं लिखेत् ९७ श्वेतसूत्रेण संवेष्ट्य लाक्ष
या परिवेष्टयेत् पंचामृतैः पंचगव्यैः स्नापयित्वा शुभेऽहनि ९८ संपूज्य देवरूपेण ता
भूमिं दत्वा च दक्षिणां प्राणप्रतिष्ठामंत्रेण प्राणांस्तत्र निवेशयेत् मंत्रैर्निततोध्या
त्वा कंठलग्नं पापनप्रदाम् शीर्षवश्यकरी देवि कण्ठे स्तंभनकारिणी १०० वक्षावा
मभुजे देवि वैरिपक्षक्षयंकरी जठरे रोगशमनी पुत्रस्वहृदि संस्थिता १०१ शिखाकु
रीललाटस्था शिखायां तु शुभप्रदा सर्वकामप्रदा देवी सर्वरोगक्षयंकरी दक्षिणे
बाहुमूलेपि यदि तिष्ठति सर्वदा तदा सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते १०२ प
नस्यकवचस्यैव पठनं धारणं प्रिये कथितं तव स्नेहाद्गोपनीयं सदा शिवे ४ गुरोः
पादप्रसादेन श्रीविद्या यदि लभ्यते तथैव कवचं देवि त्रिषु लोकेषु दुर्लभम् ५ सत्येद

वीश्वरः साक्षात्साक्षात्त्रीच परमेश्वरी यस्य भक्तिर्गुरौ देवि कर्तव्या देववत्सदा ६ तदा
मंत्रस्य तेजस्य सिद्धिर्भवति नान्यथा कवचस्य तथा सिद्धिर्घुटिकाच महेश्वरि ७ अज्ञा
त्वा कवचे देवि यो विद्यां योजयेत्प्रिये न चाप्नोति फलं तस्याः परे च नरकं व्रजेत् ८ सर्वे
सर्वं पुनः सर्वं सर्वं सर्वं पुनः पुनः न शक्नोमि प्रभावं हि कथितुं कवचस्य तु ९ जिह्वा
कोटिशतैर्देवि वक्त्रकोटिशतैरपि पंचास्येन कथं देवि वर्णितुं शक्यते मया १० यस्मै
कस्मै न दातव्यं गोप्यमतिदुर्लभं न देयं परशिष्याय कृपणाय महेश्वरि ११ गुरुभ
क्तिविहीनाय परदारसाधनाय च निंदकाय कुचैलाय दांभिकाय महेश्वरि १२ योद
दाति निषिद्धेभ्यः कवचं मन्त्रगोदितम् तस्य नश्यन्ति देवेशि विद्यायुः कीर्तिसंच
याः १३ नश्यन्ति सदा देव्यो योगिन्यो मातृमंडलात् परे नरकमाप्नोति जन्मको

त्रिक. दिशतानिच १४ देयंशिष्यायशांतायगुरुभक्तिरतायच सर्वलक्षणयुक्ताय
८. यंत्रमंत्रपरायच १५ इतिश्रीवामकेश्वरतंत्रेश्रीमद्राजराजेश्वर्याःश्रीमहात्रि
पुरसुंदर्याः कवचंसंपूर्णम् ॥